# शौरिराज भुजङ्गम्

प्रसन्नाम्बुजाक्षं लसत्केशपाशं
स्फुटत्तुङ्गनासं स्फुरन्मन्दहासम् ।
प्रयोगात्तचक्रं सशङ्खाभिरामं
परं पद्मनाभं भजे शौरिराजम् ।। १

स्फुरद्भारुपुण्ड्रं लसद्यज्ञसूत्रं
चलत्पीतचेलं तटित्तुल्यवेगम् ।
क्वणन्नूपुराढ्य भ्रमन्पादपद्मं
सुभूषोज्ज्वलाङ्गं भजे शौरिराजम् ।। २

घुमच्चारुगन्धं ज्वलद्दीपराशिं
नदद्वेदघोषं डमड्वाद्यनादम् ।
लसच्चारुवेषं मिलत्साधुसङ्गं
नमद्भक्तवर्गं भजे शौरिराजम् ।। ३

पतिं पद्मजायाः क्षमाकान्तमीड्यं
गतिं सज्जनानां गरुत्मत्सुपूज्यम् ।
नमद्भक्तपालं नरोत्तंसमाद्यं
भवाम्भोधिपोतं भजे शौरिराजम् ।। ४

शुभे नित्यवापीतटे कृष्णपुर्यां
सुधासिन्धुकन्यायुतं पद्मिनीशम् ।
चिदानन्दमूर्तिं चिरण्डीमनोज्ञं
सतां बन्धुमीशं भजे शौरिराजम् ।। ५

मुदा माघमासे महाब्धेस्सुतीर्थे
विहारं भजन्तं सुदाशैश्चपूज्यम् ।
मनोहारिवेषान् दधन्तं लसन्तं
सदानन्दपूर्णं भजे शौरिराजम् ।। ६

परव्यूहभेदैः द्विपञ्चावतारैः
तथान्यैः स्वरूपैः समर्चां भजन्तम् ।
वसन्ते हृदब्जे सतां योगिवर्यैः
सदा ध्यायमानं भजे शौरिराजम् ।। ७

खगेशं भुजङ्गं तुरङ्गं प्लवङ्गं
मृगेन्द्रं सुमञ्चं विमानं रथं च ।
अलङ्कारभेदैः समारुह्य प्रीत्या
स्वपुर्यां चरन्तं भजे शौरिराजम् ।। ८

तरण्डे प्रदीप्ते प्रियाभिः समेत्य
तटाके सुरम्ये प्लुतिं संभजन्तम् ।
सुडोलाधिरूढं स्वलंकारवेषैः
मनोहारिणं तं भजे शौरिराजम् ।। ९

पुरे सौधरम्ये वने कृष्णनाम्नि
दयापूर्णमूर्तिं सदा सुन्दराङ्गम् ।
प्रियाश्लिष्टगात्रं पृथापुत्रमित्रं
परब्रह्मरूपं भजे शौरिराजम् ।। १०

भुजङ्गप्रयातेन वृत्तेन भक्त्या
शठारातिनाम्ना कृतं स्तोत्रमेतत् ।
रथाङ्गं प्रयोगे प्रसिद्धं प्रणम्य
विभुं शौरिराजं सुखं सन्तनोतु ।। ११